**बहुकूर्च** पु० बहूनि कूर्चान्यस्य । मधुनालिकेरविके राजनि० ।

**ब(व)हुगन्ध** पु० ६ब० । १कुन्दुरुके । २त्वचे, (तेजपात) न० । ३चम्पककलिकायां ४यूथिकायां५कृष्णजीरके च स्त्री राजनि०

**बहुगन्धदा** स्त्री० ब(व)हुगन्धं ददाति दा—क । मृगमदे । राजनि० ।

**ब(व)हुग्रन्थि** पु० ६ब० । झावुके (झाउ) । शब्दर०

**बहुच्छिन्ना** स्त्री ब(व)हु यथा स्यात् छिद्यते स्म छिद्-क्त तस्य दस्य च नः । कन्दगुडूच्याम् राजनि० ।

**बहुतरकणिश** पु० ६त० । रागीधान्ये राजनि० ।

**बहुतिक्ता** स्त्री ब(व)हुस्तिक्तो रसोऽस्याः । काकमाच्याम् राजनि० ।

**ब(व)हुतिथ** त्रि० ब(व)हूनां पूरणः ब(व)हु+डट् तिथुक् च । अनेकसंख्याते, "काले गते बहुतिथे" इत्युद्भटः ।

**ब(व)हुत्र** अव्य० ब(व)हुषु त्रल् । अनेकेषु दिग्देशकालेषु ।

**ब(व)हुत्वच(क)** पु० ६ब० वा कप् । भूर्जपत्रवृक्षे शब्दर० कबन्तः हेमच० ।

**ब(व)हुदुग्ध** पु० ब(व)हूनि दुग्धानीव चूर्णानि शुभ्रवर्णत्वात् यस्य । १गोधूमे राजनि० । २ प्रचुरक्षीरवत्यां ३गवि, स्त्री हेमच०।वा कप् अत इत्त्वम् । बहुदुग्धिका स्नुही-वृक्षे स्त्री शब्दच० ।

**ब(व)हुधा** अव्य० ब(व)हु+प्रकारे—धाच् । अनेकप्रकारे

**ब(व)हुधार** न० ६ब० । वज्रास्त्रे राजनि० तस्य षट्कोणत्वात् सर्वत्र कोणेषु धारायुक्तत्वात्तथात्वम् ।

**बहुनाडीक** पु० ६त० । अस्वाङ्गत्वात् कप् । १अनेकदण्डयुते २दिवसे ३स्तम्भे च सि०कौ०।स्वाङ्गे न कप् न वा ह्रस्वः। बहुनाडी इत्येव अनेकान्त्रयुते एवं तन्त्रीशब्देऽपि ह्रस्वकपोर्भावाभावौ ज्ञेयौ ।

**बहुनाद** पु० ६ब० । शङ्खे राजनि० ।

**ब(व)हुपत्र** पु० ६ब० । १पलाण्डौ २अनेकपर्णयुक्ते त्रि० । ३लिङ्गिन्याम् ४वृतकुमार्यां ५तुलस्यां ६वृहत्यां,७गोरक्ष-दुग्धायां, ८जतुकायाञ्च स्त्री राजनि० । गौरा० ङीष् । ९तरुणीपुष्पे स्त्री टाप् । ततः संज्ञायां क । बहुपत्रिका भूम्यामलक्यां, मेथिकायां, महाशतावर्य्याञ्च राजनि० ।

**ब(व)हुपर्ण** पु० ६ब० ।१सप्तच्छदवृक्षे तस्य प्रतिपर्णं सप्तसप्त-पर्णवत्त्वात् तथात्वम् । २अनेकपर्णयुक्ते त्रि०३मेथिकायां स्त्री ङीप् । ततः संज्ञायां क । बहुपर्णिका आखुकर्ण्यां स्त्री टाप् । राजनि० ।

**ब(व)हुपाद(द)** पु० ६ब० वा अन्त्यलोपः । वटवृक्षे हलन्तः अमरः । अदन्तः राजनि०।तस्यानेकशिफावत्त्वात्तथात्वम् ।

**ब(व)हुपुत्र** ब(व)हवः पुत्रा—इव पर्णान्यस्य ।१सप्तच्छदे शब्दच० अनेके पुत्रा इव मूलान्यस्य ।२शतमूल्यां स्त्री ङीप् रत्नमा० ६ब० । ३अनेकतनयान्विते त्रि० ।

**ब(व)हुपुष्प** पु०६ब०। निम्बवृक्षे । संज्ञायां कन् अत इत्त्वम् । बहुपुष्पिका धातक्यां स्त्री राजनि० ।

**ब(व)हुप्रज** त्रि० ६ब०। १बहुसन्तानवति । २शूकरे पु० हेम०। प्रजातल्पप्रचुरत्वात् ३मुञ्जतृणे पु० राजनि० ।

**बहुप्रतिज्ञ** पु०७ब०। अनेकविषयकप्रतिज्ञायुक्ते व्यवहारे यथा मदीयं रूपकमनेन गृहीतं, सुवर्णञ्चास्य, हस्ते निक्षिप्तं न ददाति,मदीयं क्षेत्रमपहरतीत्येवमादीनां पक्षत्वमिष्यत एव किन्तु क्रियाभेदात् क्रमेण व्यवहारो न युगपदित्येव "बहुप्रतिज्ञं यत् कार्य्यं व्यवहारेषु निश्चितम् । कामं तदपि गृह्णीयात् राजा तत्त्वबुभुत्सया" कात्यायनोक्तेः मिता० [अमरः ।

**बहुप्रद** त्रि०बहूनि प्रददाति प्र+दा—क । दानशौण्डे वदान्ये

**ब(व)हुफल** पु०६ब०। १कदम्बवृक्षे मेदि०२विकङ्कते, ३तेजःफले च राजनि०। ४अनेकफलयुक्ते त्रि०।५माषपर्ण्यां,६त्रवि-कायां, ७काकमाच्यां, ८त्रिपुस्यां,(शशा)९क्षुद्रकारवेल्ल्यां, स्त्री राजनि० १०भूम्यामलक्यां भावप्र०स्त्री । ११आम-लक्यां स्त्री ङीप् मेदि० १२मृगेर्वारौ राजनि०। संज्ञायां कन् इत्त्वम् । बहुफलिका । भूमिबदर्य्यां स्त्री राजनि०।

**बहुफेना** स्त्री ६त० । सातलायां राजनि० । [बले त्रि०

**बहुबल** पु० ६ब० । १सिंहे राजनि० स्त्रियां ङीष् । २अति०

**बहुबल्ली** स्त्री नित्यक० । डोडिक्षुपे राजनि० ।

**ब(व)हुमञ्जरी** स्त्री० ६ब० संज्ञात्वात् न कप् । तुलस्याम् भावप्र०। [युक्ते त्रि० ।

**ब(व)हुमल** पु० ६ब० । १सीसके रत्नमा० । २अनेकमल०

**बहुमार्ग** न० ७ब० ।१चत्वरे हेमच० । २अनेकपथयुते त्रि० ।

**ब(व)हुमूर्त्ति** स्त्री ६ब०।१वनकार्पासे शब्दच० । २नानाकार-युते त्रि० । [तथात्वम् ।

**बहुमूर्द्धन्** पु० ६ब० । विष्णौ सहस्रशीर्षत्वात्तस्य

**ब(व)हुमूल** त्रि० ६ब० । १अनेकमूलयुते । २शिग्रौ ३स्थूल-शरे पु०राजनि०। ४माकन्द्यां ५शतावर्य्यां स्त्री टाप् । ६वनच्छागले त्रि० ङीप् राजनि० । ७नागभेदे भा० आ० ३५अ०। संज्ञायां कन् । बहुमूलक उशीरे न० भावप्र० ।

**बहुमूल्य** त्रि० ६ब० । महार्घे महाधने अमरः । [राजनि०।

**बहुरन्ध्रिका** स्त्री ६ब० वा कप् अत इत्त्वम् । मेदायाम्